560

15105

# I Semester B.C.A./B.H.M. Examination, December 2018
## (CBCS)
## LANGUAGE SANSKRIT – I
## Meghadutam, Grammar and Comprehension

Time : 3 Hours Max. Marks : 70

***Instructions :*** *1) Answer in **Sanskrit/Kannada/English**.*
*2) Question Nos. **I, V** and **VI** should be answered in **Sanskrit only**.*

I. समीचीनम् उत्तरं चिनुत।
ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.
Select the correct answer. **(10×1=10)**

1) मेघदूतं किं प्रकारकं काव्यम् ?
अ) नाटकम् आ) गद्यम् इ) चम्पूः ई) खण्डकाव्यम्

2) मेघदूतस्य कर्ता कः ?
अ) बाणः आ) कालिदासः इ) भारविः ई) दण्डी

3) यक्षः केन शप्तः ?
अ) कुबेरेण आ) गन्धर्वेण इ) किन्नरेण ई) वरुणेन

4) मेघः केषां वंशे जातः ?
अ) ब्राह्मणानाम् आ) पुष्करावर्तकानाम्
इ) क्षत्रियाणाम् ई) शूद्राणाम्

5) महाकालः कुत्र अस्ति ?
अ) उज्जयिन्याम् आ) काश्याम्
इ) देवगिर्याम् ई) पुर्याम्

6) कालिदासस्य काव्यशैली का ?
अ) गौडीया आ) लाटी इ) वैदर्भी ई) पाञ्चाली

7) के के मेघं सेविष्यन्ते ?
अ) चातकाः आ) काकाः इ) पिकाः ई) बलाकाः

P.T.O.

8) शरवणभव: क: ?

अ) वरुण: आ) स्कन्द: इ) वायु: ई) इन्द्र:

9) यक्ष: कस्मिन् दिवसे आश्लिष्टसानुं मेघं ददर्श ?

अ) आषाडप्रथमदिवसे आ) श्रावणप्रथमदिवसे

इ) चैत्रप्रथमदिवसे ई) ज्येष्ठप्रथमदिवसे

10) यक्षेश्वर: क: ?

अ) अग्नि: आ) कुबेर: इ) यम: ई) वायु:

II. **द्वयो:** प्रश्नयो: उत्तरं लिखत। **(2×10=20)**

ಯಾವುದಾದರೂ **ಎರಡು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ.

Answer **any two** of the following :

1) कालिदासस्य देश, काल, कृती: जीवनं च अधिकृत्य लिखत।

ಕಾಳಿದಾಸನ ದೇಶ, ಕಾಲ, ಕೃತಿಗಳು ಮತ್ತು ಜೀವನವನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.

Write an essay on place, date, works and life of Kalidasa.

2) मेघदूते विद्यमानानां पर्वतानां वर्णनं कुरुत।

ಮೇಘದೂತದಲ್ಲಿ ಬರುವ ಪರ್ವತಗಳನ್ನು ವರ್ಣಿಸಿ.

Describe the mountains mentioned in Meghadutam.

3) मेघदूतकाव्यस्य वस्तु अधिकृत्य संक्षेपेण लिखत।

ಮೇಘದೂತ ಕಾವ್ಯದ ವಸ್ತುವನ್ನು ಕುರಿತು ಸಂಕ್ಷೇಪವಾಗಿ ಬರೆಯಿರಿ.

Describe briefly about the plot of Meghadutam.

III. **त्रयाणां** श्लोकानाम् अनुवादं कृत्वा विवृणुत। **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate and explain **any three** of the following :

1) कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्त:
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तु:।
यक्षश्चक्रेजनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।

2) तां चावश्यं दिवसगणनातत्परामेकपत्नीं
अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम्
सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि।।

3) मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य।।

4) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।

5) तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूनां
अत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः।।

IV. **द्वयोः** ससन्दर्भं विवृणुत। **(2×4=8)**

ಯಾವುದಾದರೂ **ಎರಡು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Annotate **any two** of the following :

1) प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।

2) याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा।

3) शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्।

4) संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः।

V. **संस्कृत**भाषया उत्तराणि लिखत।

a) **पञ्चानां** लिङ्ग विभक्तिवचनानि लिखत। **(5×1=5)**

| | | | |
|---|---|---|---|
| 1) प्रियायाः | 2) लोचनैः | 3) तासाम् | 4) गुरोः |
| 5) दिवसे | 6) भर्तुः | 7) बिन्दून् | 8) ते |

b) **पञ्चानां** लकार पुरुषवचनानि लिखत। **(5×1=5)**

| | | | |
|---|---|---|---|
| 1) पश्यामि | 2) गच्छ | 3) लभन्ते | 4) भवामि |
| 5) अभवत् | 6) प्रेक्षिष्यन्ते | 7) अस्ति | 8) ददर्श |

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (5×2=10)

अस्मिन् संसारे सर्वे जीविनः सुखप्राप्तये उद्योगशीलाः दृश्यन्ते। उद्योगिनो मनुष्याः धनं प्राप्य सुखं लभन्ते। उद्योगेन एव धनवन्तः भवन्ति। उद्योगः प्राणिनां नियतो धर्मः। उद्योगेनैव असम्भवान्यपि सम्भवन्ति, दुःसाध्यानि अपि सुसाध्यानि भवन्ति। उद्योगेनैव सर्वं फलति। देवाः अपि उद्योगिनः साहाय्यं कुर्वन्ति, यः प्रयत्नशीलोऽस्ति। निरुद्योगिनः राष्ट्रस्य घातकाः भवन्ति। श्रीकृष्णः अपि कर्मयोगे बोधयति कुत्रापि कर्माणि विना जीवनं साफल्यं न भवति। राष्ट्रस्य समुन्नतिः उद्योगेनैव जायते।

**प्रश्ना :**

1) कीदृशाः मनुष्याः सुखं लभन्ते ?

2) उद्योगेन कानि कानि साधनानि भवन्ति ?

3) देवाः कस्य साहाय्यं कुर्वन्ति ?

4) श्रीकृष्णः किं बोधयति ?

5) राष्ट्रस्य समुन्नतिः केन जायते ?

---